Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 2 | ISSN : 2581- 6306

# वाचस्पतिमिश्र: तस्य न्यायतात्पर्यटीका च



**डॉ.दिनेश कुमार झा**
**ग्रा.पो. अंधराठाढी, जि. मधुबनी, बिहार**
**भारत।**

**साराश:** – वेद एव वर्णाश्रमधर्मव्यवस्थापक: सकलशास्त्रदिमूलीभूतो महर्षिमहाजन परिगृहीत:। यथा विषादिनाशकमन्त्रादीनामायुर्वै शास्त्रस्य च नित्यसर्वज्ञपरमेश्वरोपदिष्टतयैव प्रामाण्यमिह लोके परीक्षितं, तथा तादृशपरमेश्वरोक्तत्वेनैव वेदस्यापि प्रामाण्यं स्वीकरणीयमिति। एवं योगदर्शनभाष्यटीकायामपि श्रीमता मिश्रमहोदयेन निरुक्तं गौतमीयसूत्रं व्याख्यातं, तत्रापि नित्यसर्वज्ञपरमेश्वरातिरिक्तपुरुषोक्तत्वं मन्त्रयुर्वेदशास्त्रयोनिराकृतं प्रतिपादितरचातीन्द्रियतत्त्वप्रतिपादक–वेदवक्तृत्वमीश्वरस्यैवेति न्यायसिद्धान्त:। श्रीमदुदयनाचार्यजयन्तभट्ट गङ्गेशोपाध्यायप्रभृति महानैयायिकैरपि निरुक्तसर्वतन्त्रस्वतन्त्रवाचस्पतिमिश्र–महोदयसिद्धान्त एव विशेषविचारपूर्वकं समर्थित इत्यास्तां विस्तर:।

**मुख्य शब्द:** – वाचस्पतिमिश्र:, न्यायतात्पर्यटीका, महादार्शनिक:, प्राचीन:।

---

आसीदेको महादार्शनिक: प्राचीन: प्राय: सहस्रवत्सरपूर्ववर्त्ती विविधबुधजन–समाट्टतान्तविध: स्वरचितटीका ग्रन्थालोकमालया सम्पादितसमस्तास्तिकदर्शनकाठिन्यतामसविनाश: पृथिवीमण्डलमण्डनयितयशोरा शिरतुलानवद्यविद्याभूषणो राजराजाधिपप्रणतचरणयुगल: सर्वतन्त्रस्वतन्त्र: श्रीमद्वावाचस्पतिमिश्रनामक: सर्वप्रधानीभूत: पण्डितप्रवर:।

कालवशात् विलुप्ते वार्तिककारोद्द्योतकरसम्प्रदाये वार्त्तिकटीकानिबन्धे कुनिबन्धतां गते च वार्त्तिकपाठस्य विकृताभवलोक्य त्रिलोचनगुरोर्गुरूपदेशमवाप्य च प्राप्तस्वकीयगुरुसाहाय्येन तेन श्रीमता वाचस्पतिमिश्र महोदयेन न्यायवार्तिकतात्पर्यटीकां विरचितवता वार्त्तिकोद्धार एव संसाधित:। अत एव तात्पर्यटीका प्रारम्भे तेनैवाभिहितम्–

**इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धपङ्कमग्नानाम्।**

**उदद्योतकरगवीनामतिजरतीनां समुद्धरणादिति।।**

अत्र उद्द्योतकरगवीनामित्यादिवाक्यघटकगोशब्देन प्रथमपक्षे वार्त्तिकनिबन्धरूपवाक्यसमूहस्य, पक्षान्तरे तु गोरेव ग्रहणं व्यक्तम्। जरतीनामिति विशेषणेन तु वाचस्पतिमिश्रसमयेऽपि वार्त्तिककारस्यातिप्राचीनत्वं निरूपितं स्यादित्येतत् सर्वमेवोदयनाचार्यस्य निरुक्तश्लोकव्याख्यां परिस्फुटमेवागन्तव्यं नेहास्मानिरतिविस्तर: समाद्रियते।

तात्पर्यटीका प्रारम्भे महादार्शनिको मिश्रमहोदयो वेदमूलकस्य महामुनिगौतमप्रणीतस्य न्यायदर्शनस्य शुद्रादीनामप्यनुचितमध्ययनं कदाचित् सम्भवतीति महामुनेः पापभागित्वं स्यादिति नवीनं पूर्वपक्षं समुद्भाव्य तादृशाध्ययनजनितपापभागित्वेऽपि तस्य महामुनेस्तपः प्रभावादेव तादृशपापविनाशस्यावश्यकतया न तस्य मुनेः पापं कथमप्याशङ्कनीयमिति स एव समाहितवान्। वस्तुनो वाचस्पतिमिश्रमहोदयस्य तात्पर्यटीकायां प्रत्यक्षादिलक्षणानामभिनवव्याख्यानमतिपण्डित्यपूर्णमनोरममेवावलोक्यते। तस्य समस्तटीकात एव तात्पर्यटीका प्रधानीभूता इत्यत्र नास्ति कोऽपि सन्देहः। अत एव तेन तत्त्वकौमुदी प्रभृतिटीकाग्रन्थे 'इत्येतत्' सर्व तात्पर्यटीकायामेवोपपादितमस्माभिरित्याभिधाय तात्पर्यटीकायाः प्रधान्यं व्यवस्थापितम्।

केचित्तु "न्यायमंजरीप्रसवित्रे विद्यातरवे नमोगुरवे'' इत्यादि (विधिविवेकस्य न्यायकणिकानामकग्रन्थे) मिश्रमहोदयकृत प्रथममङ्गलश्लोकदर्शनात् न्यायमंजरीकारो जयन्तभट्ट एव वाचस्पतिमिश्रस्य मीमांसाशास्त्रध्यापक इति नवीनसिद्धान्तं समर्पयन्ति।

न केवलं वार्त्तिकारस्यातिवृद्धत्वमात्रं तात्पर्यटीकाकृताऽभिहितम् अपि तु तन्मतं तेनैव टीकाकृतोपेक्षितमित्यपि दृश्यते, न्यायदर्शन प्रथमसूत्रघटकनिःश्रेयसशब्दस्तु दृष्टाऽदृष्टभेदेन द्विविधनिःश्रेयसपर इत्युक्तं वार्त्तिककृता, टीकाकृता तु निःश्रेयसशब्देन चरममुक्तिरेव ग्राह्येत्युक्तमतो मतभेदोऽवश्यं विचारणीय एव। वस्तुतो महामुनिगौतमोक्तन्यायदर्शनस्य चरममुक्तिपरत्वमेव समीचीन-मस्माभिरवगम्यते। अत एव महर्षिगौतमस्य "तदत्यन्तविमोक्षोऽपवर्ग'' इति सूत्रमपि साधुसङ्गच्छते, आत्यन्तिकदु5खनिवृत्तेरेव चरममुक्तिस्वरूपत्वात्। तथा च स्वसमानकालीनदुःखप्रागभावसमानकालीनो यो यो दुःखध्वंसस्तावद्भेदकूटविशिष्ट-दुःखध्वंस एव चरमनिःश्रेयसपदार्थस्तात्पर्यटीकाकारतात्पर्यविषयीभूत इति फलितम्। विचारपूर्वकं समस्तप्रयोजनसिद्धौ न्यायशास्त्रस्यावश्यकतया न्यायशास्त्रस्य प्रदीपस्वरूपत्वं वर्णयतो नित्यसुखाभिव्यक्तेमुक्तित्वं निराकुर्वतश्च न्यायभाष्यकृतो निरुक्तार्थकमुक्तावेव निःश्रेयसशब्दस्य तात्पर्यं सम्भवतीत्यस्य टीकाकृता व्याख्यातत्वाच्चरममुक्तिपदार्थक एव निःश्रेयशब्द इति सयुक्तिकः सिद्धान्तः।

अनेके पुनरद्वैतसिद्धिकारप्रभृतयः सर्वदर्शनसमन्वयं चिकीर्षवः प्रथममद्वैतसिद्धान्ते प्रवेशाऽसम्भवात् द्वैतमतं प्रतिपादयतोऽपि महामुनेर्गौतमस्याद्वैतवादित्वमेव वदन्ति। तत्र तु सर्वतन्त्रस्वतन्त्रस्य श्रीमतो वाचस्पतिमिश्रस्य न सम्मतिर्वर्तते, तेन तावत् कणादगौतममतविचारावसरे तयोद्वैतमतस्यैव व्याख्यातत्वात्।

न्यायतात्पर्यटीका ग्रन्थे गौतमीयचतुर्थाध्यायसूत्रमवलम्ब्याद्वैतमतमपि तेन निराकृतमतो महर्षेगौतमस्याद्वैतवादित्वाभिधानं निर्युक्तिकमेव।

महेश्वरसिद्धावपि श्रीमद्वाचस्पतिमिश्रमहोदयेन तात्पर्यटीकायां समीचीना युक्तिः प्रदर्शिता, मन्त्रयुर्वेदप्रामाण्यवच्चेत्यादिन्यायदर्शनसूत्रेण महामुनिना कुत्रचित् पुरुषविशेष वेदकर्त्तृत्वादिकं व्यवस्थापितमपि कोऽयं पुरुषविशेष इति नाभिहितं, किन्तु सीमद्वाचस्पतिमिश्रमहोदयेन तादृशगौतमसूत्रव्याख्या काले कथितं यत् जगत्कर्त्ता परमेश्वरो नित्यसर्वज्ञपरमकारुणिकः पुरुषविशेष इति नाभिहितं, किन्तु श्रीमद्वाचस्पतिमिश्रमहोदयेन तादृशगौतमसूत्रव्याख्याकाले कथितं यत् जगत्कर्त्ता परमेश्वरो नित्यसर्वज्ञः परमकारुणिकः पुरुषविशेष। स तु सृष्टयुत्तरकालं मानवगणानां परमहिताय बहूपदेशं कृतवान्। तस्य समस्तोपदेशवाक्यमेव वेदः। वेद एव वर्णाश्रमधर्मव्यवस्थापकः सकलशास्त्रदिमूलीभूतो महर्षिमहाजन परिगृहीतः। यथा विषादिनाशकमन्त्रादीनामायुर्वै

शास्त्रस्य च नित्यसर्वज्ञपरमेश्वरोपदिष्टतयैव प्रामाण्यमिह लोके परीक्षितं, तथा तादृशपरमेश्वरोक्तत्वेनैव वेदस्यापि प्रामाण्यं स्वीकरणीयमिति। एवं योगदर्शनभाष्यटीकायामपि श्रीमता मिश्रमहोदयेन निरुक्तं गौतमीयसूत्रं व्याख्यातं, तत्रापि नित्यसर्वज्ञपरमेश्वरातिरिक्तपुरुषोक्तत्वं मन्त्रयुर्वेदशास्त्रयोनिराकृतं प्रतिपादितरचातीन्द्रियतत्त्वप्रतिपादक–वेदवक्तृत्वमीश्वरस्यैवेति न्यायसिद्धान्तः। श्रीमदुदयनाचार्यजयन्तभट्ट गङ्गेशोपाध्यायप्रभृति महानैयायिकैरपि निरुक्तसर्वतन्त्रस्वतन्त्रवाचस्पतिमिश्र–महोदयसिद्धान्त एव विशेषविचारपूर्वकं समर्थित इत्यास्तां विस्तरः।

**सन्दर्भग्रन्थाः-**


1. न्यायभाष्यवार्त्तिकतात्पर्यटीका- वाचस्पतिमिश्रः, भारतीयदार्शनिक अनुसंधान परिषद्, नई दिल्ली
2. लक्षणमाला, उदयनाचार्य, मिथिला संस्कृत विद्यापीठ, दरभंगा
3. न्यायवार्त्तिकतात्पर्यपरिशुद्धि, उदयनाचार्य, भारतीयदार्शनिक अनुसंधान परिषद्, नई दिल्ली
4. बौद्धतर्कभाषा, मोक्षकरगुप्त, प्राच्य प्रकाशन, वाराणसी